श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्तविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तविंशः सर्गः ॥

## वानरसैन्यस्य प्रधानयूथपतीनां परिचयः

तांस्तु ते सम्प्रवक्ष्यामि प्रेक्षमाणस्य यूथपान्।
राघवार्थे पराक्रान्ता ये न रक्षन्ति जीवितम्॥ **6.27.1** ॥

स्निग्धा यस्य बहुव्यामा दीर्घलाङ्गूलमाश्रिताः।
ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः॥ **6.27.2** ॥

प्रगृहीताः प्रकाशन्ते सूर्यस्येव मरीचयः।
पृथिव्यां चानुकृष्यन्ते हरो नामैष वानरः॥ **6.27.3** ॥

यं पृष्ठतोऽनुगच्छन्ति शतशोऽथ सहस्रशः।
वृक्षानुद्यम्य सहसा लङ्कारोहणतत्पराः॥ **6.27.4** ॥

यूथपा हरिराजस्य किङ्कराः समुपस्थिताः।
नीलानिव महामेघांस्तिष्ठतो यांस्तु पश्यसि॥ **6.27.5** ॥

असिताञ्जनसङ्काशान् युद्धे सत्यपराक्रमान्।
असङ्ख्येयाननिर्देशान् परं पारमिवोदधेः॥ **6.27.6** ॥

पर्वतेषु च ये केचिद् विषयेषु नदीषु च।
एते त्वामभिवर्तन्ते राजन्नृक्षाः सुदारुणाः॥ **6.27.7** ॥

एषां मध्ये स्थितो राजन् भीमाक्षो भीमदर्शनः।
पर्जन्य इव जीमूतैः समन्तात् परिवारितः॥ **6.27.8** ॥

ऋक्षवन्तं गिरिश्रेष्ठमध्यास्ते नर्मदां पिबन्।
सर्वर्क्षाणामधिपतिर्धूम्रो नामैष यूथपः॥ **6.27.9** ॥

यवीयानस्य तु भ्राता पश्यैनं पर्वतोपमम्।
भ्रात्रा समानो रूपेण विशिष्टस्तु पराक्रमे॥ **6.27.10** ॥

स एष जाम्बवान् नाम महायूथपयूथपः।
प्रशान्तो गुरुवर्ती च सम्प्रहारेष्वमर्षणः॥ **6.27.11** ॥

एतेन साह्यं तु महत् कृतं शक्रस्य धीमता।
दैवासुरे जाम्बवता लब्धाश्च बहवो वराः॥ **6.27.12** ॥

आरुह्य पर्वताग्रेभ्यो महाभ्रविपुलाः शिलाः।
मुञ्चन्ति विपुलाकारा न मृत्योरुद्विजन्ति च॥ **6.27.13** ॥

राक्षसानां च सदृशाः पिशाचानां च रोमशाः।
एतस्य सैन्या बहवो विचरन्त्यमितौजसः॥ **6.27.14** ॥

य एनमभिसंरब्धं प्लवमानमवस्थितम्।
प्रेक्षन्ते वानराः सर्वे स्थिता यूथपयूथपम्॥ **6.27.15** ॥

एष राजन् सहस्राक्षं पर्युपास्ते हरीश्वरः।
बलेन बलसंयुक्तो दम्भो नामैष यूथपः॥ **6.27.16** ॥

यः स्थितं योजने शैलं गच्छन् पार्श्वेन सेवते।
ऊर्ध्वं तथैव कायेन गतः प्राप्नोति योजनम्॥ **6.27.17** ॥

यस्मात् तु परमं रूपं चतुष्पात्सु न विद्यते।
श्रुतः सन्नादनो नाम वानराणां पितामहः॥ **6.27.18** ॥

येन युद्धं तदा दत्तं रणे शक्रस्य धीमता।
पराजयश्च न प्राप्तः सोऽयं यूथपयूथपः॥ **6.27.19** ॥

यस्य विक्रममाणस्य शक्रस्येव पराक्रमः।
एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मना॥ **6.27.20** ॥

तदा देवासुरे युद्धे साह्यार्थं त्रिदिवौकसाम्।
यत्र वैश्रवणो राजा जम्बूमुपनिषेवते॥ **6.27.21** ॥

यो राजा पर्वतेन्द्राणां बहुकिन्नरसेविनाम्।
विहारसुखदो नित्यं भ्रातुस्ते राक्षसाधिप॥ **6.27.22** ॥

तत्रैष रमते श्रीमान् बलवान् वानरोत्तमः।
युद्धेष्वकत्थनो नित्यं क्रथनो नाम यूथपः॥ **6.27.23** ॥

वृतः कोटिसहस्रेण हरीणां समवस्थितः।
एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम्॥ **6.27.24** ॥

यो गङ्गामनुपर्येति त्रासयन् गजयूथपान्।
हस्तिनां वानराणां च पूर्ववैरमनुस्मरन्॥ **6.27.25** ॥

एष यूथपतिर्नेता गर्जन् गिरिगुहाशयः।
गजान् रोधयते वन्यानारुजंश्च महीरुहान्॥ **6.27.26** ॥

हरीणां वाहिनीमुख्यो नदीं हैमवतीमनु।
उशीरबीजमाश्रित्य मन्दरं पर्वतोत्तमम्॥ **6.27.27** ॥

रमते वानरश्रेष्ठो दिवि शक्र इव स्वयम्।
एनं शतसहस्राणां सहस्रमभिवर्तते॥ **6.27.28** ॥

वीर्यविक्रमदृप्तानां नर्दतां बाहुशालिनाम्।
स एष नेता चैतेषां वानराणां महात्मनाम्॥ **6.27.29** ॥

स एष दुर्धरो राजन् प्रमाथी नाम यूथपः।
वातेनेवोद्धतं मेघं यमेनमनुपश्यसि ॥ **6.27.30** ॥

अनीकमपि संरब्धं वानराणां तरस्विनाम्।
उद्धूतमरुणाभासं पवनेन समन्ततः ॥ **6.27.31** ॥

विवर्तमानं बहुशो यत्रैतद्बहुलं रजः।
एतेऽसितमुखा घोरा गोलाङ्गूला महाबलाः ॥ **6.27.32** ॥

शतं शतसहस्राणि दृष्ट्वा वै सेतुबन्धनम्।
गोलाङ्गूलं महाराज गवाक्षं नाम यूथपम् ॥ **6.27.33** ॥

परिवार्याभिनर्दन्ते लङ्कां मर्दितुमोजसा।
भ्रमराचरिता यत्र सर्वकालफलद्रुमाः ॥ **6.27.34** ॥

यं सूर्यस्तुल्यवर्णाभमनुपर्येति पर्वतम्।
यस्य भासा सदा भान्ति तद्वर्णा मृगपक्षिणः ॥ **6.27.35** ॥

यस्य प्रस्थं महात्मानो न त्यजन्ति महर्षयः।
सर्वकामफला वृक्षाः सदा फलसमन्विताः ॥ **6.27.36** ॥

मधूनि च महार्हाणि यस्मिन् पर्वतसत्तमे।
तत्रैष रमते राजन् रम्ये काञ्चनपर्वते ॥ **6.27.37** ॥

मुख्यो वानरमुख्यानां केसरी नाम यूथपः।
षष्टिर्गिरिसहस्राणि रम्याः काञ्चनपर्वताः ॥ **6.27.38** ॥

तेषां मध्ये गिरिवरस्त्वमिवानघ रक्षसाम्।
तत्रैके कपिलाः श्वेतास्ताम्रास्या मधुपिङ्गलाः ॥ **6.27.39** ॥

निवसन्त्यन्तिमगिरौ तीक्ष्णदंष्ट्रा नखायुधाः।
सिंहा इव चतुर्दंष्ट्रा व्याघ्रा इव दुरासदाः ॥ **6.27.40** ॥

सर्वे वैश्वानरसमा ज्वलदाशीविषोपमाः।
सुदीर्घाञ्चितलाङ्गूला मत्तमातङ्गसन्निभाः॥ **6.27.41** ॥

महापर्वतसङ्काशा महाजीमूतनिःस्वनाः।
वृत्तपिङ्गलनेत्रा हि महाभीमगतिस्वनाः॥ **6.27.42** ॥

मर्दयन्तीव ते सर्वे तस्थुर्लङ्कां समीक्ष्य ते।
एष चैषामधिपतिर्मध्ये तिष्ठति वीर्यवान्॥ **6.27.43** ॥

जयार्थी नित्यमादित्यमुपतिष्ठति वीर्यवान्।
नाम्ना पृथिव्यां विख्यातो राजञ्शतबलीति यः॥ **6.27.44** ॥

एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम्।
विक्रान्तो बलवाञ्छूरः पौरुषे स्वे व्यवस्थितः॥ **6.27.45** ॥

रामप्रियार्थं प्राणानां दयां न कुरुते हरिः।
गजो गवाक्षो गवयो नलो नीलश्च वानरः॥ **6.27.46** ॥

एकैकमेव योधानां कोटिभिर्दशभिर्वृतः।
तथान्ये वानरश्रेष्ठा विन्ध्यपर्वतवासिनः।
न शक्यन्ते बहुत्वात् तु सङ्ख्यातुं लघुविक्रमाः॥ **6.27.47** ॥

सर्वे महाराज महाप्रभावाः
सर्वे महाशैलनिकाशकायाः।
सर्वे समर्थाः पृथिवीं क्षणेन
कर्तुं प्रविध्वस्तविकीर्णशैलाम्॥ **6.27.48** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तविंशः सर्गः॥